श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ब्रह्मसंहितायां त्रैलोक्यमोहनं नाम

# ॥ श्रीनृसिंहकवचम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनृसिंहकवचम् ॥

नारद उवाच
इन्द्रादिदेववृन्देश ईड्येश्वर जगत्पते।
महाविष्णोर्नृसिंहस्य कवचं ब्रूहि मे प्रभो।
यस्य प्रपठनाद् विद्वांस्त्रैलोक्यविजयी भवेत्॥

ब्रह्मोवाच
शृणु नारद वक्ष्यामि पुत्रश्रेष्ठ तपोधन।
कवचं नरसिंहस्य त्रैलोक्यविजयी भवेत्॥ १ ॥

स्रष्टाऽहं जगतां वत्स पठनाद् धारणाद् यतः।
लक्ष्मीर्जगत्त्रयं पाति संहर्ता च महेश्वरः॥ २ ॥

पठनाद् धारणाद् देवाः बहवश्च दिगीश्वराः।
ब्रह्ममन्त्रमयं वक्ष्ये भ्रान्तादिविनिवारकम्॥ ३ ॥

यस्य प्रसादाद् दुर्वासास्त्रैलोक्यविजयी भवेत्।
पठनाद् धारणाद् योऽस्य शास्ता च क्रोधभैरवः॥ ४ ॥

त्रैलोक्यविजयस्यापि कवचस्य प्रजापतिः।
ऋषिः छन्दस्तु गायत्री नृसिंहो देवता विभुः॥ ५ ॥

क्ष्रौं बीजं मे शिरः पातु चन्द्रवर्णो महामनुः।
ओं उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्॥ ६ ॥

नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्।
द्वात्रिंशदक्षरो मन्त्रो मन्त्रराजः सुरद्रुमः॥ ७ ॥

कण्ठं पातु ध्रुवं क्ष्रौं हृद्भगवते चक्षुषी मम।
नरसिंहाय च ज्वालामालिने पातु कर्णकम्॥ ८ ॥

दीप्तदंष्ट्राय च तथा अग्निनेत्राय नासिकाम्।
सर्वरक्षोघ्नाय च तथा सर्वभूतहिताय च॥ ९ ॥

सर्वज्वरविनाशाय दह दह पदद्वयम्।
रक्ष रक्ष वर्ममन्त्रः स्वाहा पातु मुखं मम॥ १० ॥

तारादिरामचन्द्राय नमः पातु हृदं मम।
क्लीं पायात् पार्श्वयुग्मञ्च तारो नमः पदं ततः॥ ११ ॥

नारायणाय नाभिञ्च आं ह्रीं क्रौं क्ष्रौं च हुं फट्।
षडक्षरः कटिं पातु ओं नमो भगवते पदम्॥ १२ ॥

वासुदेवाय च पृष्ठं क्लीं कृष्णाय क्लीं ऊरुद्वयम्।
क्लीं कृष्णाय सदा पातु जानुनी च मनूत्तमः॥ १३ ॥

क्लीं ग्लौं क्लीं श्यामलाङ्गाय नमः पायात् पदद्वयम्।
क्ष्रौं नृसिंहाय क्ष्रौं च सर्वाङ्गं मे सदाऽवतु॥ १४ ॥

इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम्।
तव स्नेहान्मयाऽऽख्यातं गृह्णीयात् कवचं ततः॥ १५ ॥

गुरुपूजां विधायाथ गृह्णीयात् कवचं ततः।
सर्वपुण्ययुतो भूत्वा सर्वसिद्धियुतो भवेत्॥ १६ ॥

शतमष्टोत्तरञ्चास्य पुरश्चर्याविधिः स्मृतः।
हवनादीन् दशांशेन कृत्वा तत्साधकोत्तमः॥ १७ ॥

ततस्तु सिद्धकवचो रूपेण मदनोपमः।
स्पर्धामुद्धूय भवने लक्ष्मीर्वाणी वसेत्मुखे॥ १८ ॥

पुष्पाञ्जल्यष्टकं दत्त्वा मूलेनैव पठेत् सकृत्।
अपि वर्षसहस्राणां पूजानां फलमाप्नुयात्॥ १९ ॥

भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद् यदि।
कण्ठे वा दक्षिणे बाहौ नरसिंहो भवेत् स्वयम्॥ २० ॥

योषिद् वामभुजे चैव पुरुषो दक्षिणे करे।
बिभृयात् कवचं पुण्यं सर्वसिद्धियुतो भवेत्॥ २१॥

काकवन्ध्या च या नारी मृतवत्सा च या भवेत्।
जन्मवन्ध्या नष्टपुत्रा बहुपुत्रवती भवेत्॥ २२॥

कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः।
त्रैलोक्यं क्षोभयत्येवं त्रैलोक्यविजयी भवेत्॥ २३॥

भूतप्रेतपिशाचाश्च राक्षसा दानवाश्च ये।
तं दृष्ट्वा प्रपलायन्ते देशाद्देशान्तरं ध्रुवम्॥ २४॥

यस्मिन् गृहे च कवचं ग्रामे वा यदि तिष्ठति।
तद्देशं तु परित्यज्य प्रयान्ति ह्यतिदूरतः॥ २५॥

॥ इति श्रीनृसिंहकवचं समाप्तम्॥